# Rama Raksha Stotram in Sanskrit

**Rama Raksha Stotram – Sanskrit Lyrics (Text)**

Rama Raksha Stotram – Sanskrit Script

रचनः बुध कौशिक ऋषि

ॐ अस्य श्री रामरक्षा स्तोत्रमन्त्रस्य बुधकौशिक ऋषिः
श्री सीताराम चन्द्रोदेवता
अनुष्टुप् छन्दः
सीता शक्तिः
श्रीमान् हनुमान् कीलकं
श्रीरामचन्द्र प्रीत्यर्थे रामरक्षा स्तोत्रजपे विनियोगः

ध्यानम्
ध्यायेदाजानुबाहुं धृतशर धनुषं बद्द पद्मासनस्थं
पीतं वासोवसानं नवकमल दलस्पर्थि नेत्रं प्रसन्नम्
वामाङ्कारूढ सीतामुख कमल मिलल्लोचनं नीरदाभं
नानालङ्कार दीप्तं दधतमुरु जटामण्डलं रामचन्द्रम्

स्तोत्रम्
चरितं रघुनाथस्य शतकोटि प्रविस्तरम्
ऐकैकमक्षरं पुंसां महापातक नाशनम्

ध्यात्वा नीलोत्पल श्यामं रामं राजीवलोचनम्
जानकी लक्ष्मणोपेतं जटामुकुट मण्डितम्

सासितूण धनुर्बाण पाणिं नक्तं चरान्तकम्
स्वलीलया जगत्रातु माविर्भूतमजं विभुम्

रामरक्षां पठेत्प्राज्ञः पापघ्नीं सर्वकामदाम्
शिरो मे राघवः पातुफालं दशरथात्मजः

http://god-vishnu.blogspot.com/

कौसल्यॆयॊ दृशौपातु विश्वामित्र प्रियः शृती
घ्राणं पातु मखत्राता मुखं सौमित्रिवत्सलः

जिह्वां विद्यानिधिः पातु कण्ठं भरत वन्दितः
स्कन्धौ दिव्यायुधः पातु भुजौ भग्नॆशकार्मुकः

करौ सीतापतिः पातु हृदयं जामदग्न्यजित्
मध्यं पातु खरध्वंसी नाभिं जाम्बवदाश्रयः

सुग्रीवॆशः कटीपातु सक्थिनी हनुमत्-प्रभुः
ऊरू र□ुतमः पातु रक्षकुल विनाशकृत्

जानुनी सॆतुकृत् पातु जङ्□ॆ दशमुखान्तकः
पादौविभीषण श्रीदःपातु रामॊऽखिलं वपुः

ऎतां रामबलॊपॆतां रक्षां यः सुकृती पठॆत्
सचिरायुः सुखी पुत्री विजयी विनयी भवॆत्

पाताल भूतल व्यॊम चारिणश्-चद्म चारिणः
न द्रष्टुमपि शक्तास्तॆ रक्षितं रामनामभिः

रामॆति रामभद्रॆति रामचन्द्रॆति वास्मरन्
नरॊ नलिप्यतॆ पापैर्भुक्तिं मुक्तिं च विन्दति

ज□ज्जैत्रैक मन्त्रॆण रामनाम्नाभि रक्षितम्
यः कण्ठॆ धारयॆत्तस्य करस्थाः सर्व सिद्धयः

वज्रपञ्जर नामॆदं यॊ रामकवचं स्मरॆत्
अव्याहताज्ञः सर्वत्र लभतॆ जय मङ्□लम्

आदिष्टवान् यथास्वप्नॆ राम रक्षा मिमां हरः
तथा लिखितवान् प्रातः प्रबुद्धौ बुधकौशिकः

http://god-vishnu.blogspot.com/

आरामः कल्पवृक्षाणां विरामः सकलापदाम्
अभिराम स्त्रिलोकानां रामः श्रीमान्सनः प्रभुः

तरुणौ रूपसम्पन्नौ सुकुमारौ महाबलौ
पुण्डरीक विशालाक्षौ चीरकृष्णा जिनाम्बरौ

फलमूलासिनौ दान्तौ तापसौ ब्रह्मचारिणौ
पुत्रौ दशरथस्यैतौ भ्रातरौ रामलक्ष्मणौ

शरण्यौ सर्वसत्वानां श्रेष्टा सर्व धनुष्मतां
रक्षःकुल निहन्तारौ त्रायेतां नो रघूत्तमौ

आत्त सज्य धनुषा विषुस्पृशा वक्षयाशुग निषङ्ग सङ्गिनौ
रक्षणाय मम रामलक्षणावग्रतः पथिसदैव गच्छतां

सन्नद्धः कवची खड्गी चापबाणधरो युवा
गच्छन् मनोरथान्नश्च रामः पातु स लक्ष्मणः

रामो दाशरथि श्शूरो लक्ष्मणानुचरो बली
काकुत्सः पुरुषः पूर्णः कौसल्येयो रघूत्तमः

वेदान्त वेद्यो यज्ञेशः पुराण पुरुषोत्तमः
जानकीवल्लभः श्रीमानप्रमेय पराक्रमः

इत्येतानि जपेन्नित्यं मद्भक्तः श्रद्धयान्वितः
अश्वमेथाधिकं पुण्यं सम्प्राप्नोति नसंशयः

रामं दूर्वादल श्यामं पद्माक्षं पीतावाससं
स्तुवन्ति नाभिर्-दिव्यैर्-नतें संसारिणो नराः

रामं लक्ष्मण पूर्वजं रघुवरं सीतापतिं सुन्दरं
काकुत्सं करुणार्णवं गुणनिधिं विप्रप्रियं धार्मिकं

राजॆन्द्रं सत्यसन्धं दशरथतनयं श्यामलं शान्तमूर्तिं
वन्दॆलॊकाभिरामं रघुकुल तिलकं राघवं रावणारिम्

रामाय रामभद्राय रामचन्द्राय वॆथसॆ
रघुनाथाय नाथाय सीतायाः पतयॆ नमः

श्रीराम राम रघुनन्दन राम राम
श्रीराम राम भरताग्रज राम राम
श्रीराम राम रणकर्कश राम राम
श्रीराम राम शरणं भव राम राम

श्रीराम चन्द्र चरणौ मनसा स्मरामि
श्रीराम चन्द्र चरणौ वचसा □ृह्णामि
श्रीराम चन्द्र चरणौ शिरसा नमामि
श्रीराम चन्द्र चरणौ शरणं प्रपद्यॆ

मातारामॊ मत्-पिता रामचन्द्रः
स्वामी रामॊ मत्-सखा रामचन्द्रः
सर्वस्वं मॆ रामचन्द्रॊ दयालुः
नान्यं जानॆ नैव न जानॆ

दक्षिणॆलक्ष्मणॊ यस्य वामॆ च जनकात्मजा
पुरतॊमारुतिर्-यस्य तं वन्दॆ रघुवन्दनम्

लॊकाभिरामं रणरङ्□धीरं
राजीवनॆत्रं रघुवंशनाथं
कारुण्यरूपं करुणाकरं तं
श्रीरामचन्द्रं शरण्यं प्रपद्यॆ

मनॊजवं मारुत तुल्य वॆ□ं
जितॆन्द्रियं बुद्धिमतां वरिष्टं
वातात्मजं वानरयूध मुख्यं

http://god-vishnu.blogspot.com/

श्रीरामदूतं शरणं प्रपद्ये

कूजन्तं रामरामेति मधुरं मधुराक्षरं
आरुह्यकविता शाखां वन्दे वाल्मीकि कोकिलम्

आपदामपहर्तारं दातारं सर्वसम्पदां
लोकाभिरामं श्रीरामं भूयोभूयो नमाम्यहं

भर्जनं भवबीजानामर्जनं सुखसम्पदां
तर्जनं यमदूतानां राम रामेति गर्जनम्

रामो राजमणिः सदा विजयते रामं रमेशं भजे
रामेणाभिहता निशाचरचमू रामाय तस्मै नमः
रामान्नास्ति परायणं परतरं रामस्य दासोस्म्यहं
रामे चित्तलयः सदा भवतु मे भो राम मामुद्धर

श्रीराम राम रामेति रमे रामे मनोरमे
सहस्रनाम तत्तुल्यं राम नाम वरानने

इति श्रीबुधकौशिकमुनि विरचितं श्रीराम रक्षास्तोत्रं सम्पूर्णं

श्रीराम जयराम जयजयराम

http://god-vishnu.blogspot.com/